National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(22): 25-27
© 2019 NJHSR
www.sanskritarticle.com

**Dr.Anil Kumar Dash**
Guest Lectuter,P.G.Teaching,
Deptt. Of Dharmashastra,
S.J.S.V.,Shrivihar,PURI,
Odisha-752003

**Correspondence:**
**Dr.Anil Kumar Dash**
Guest Lectuter,P.G.Teaching,
Deptt. Of Dharmashastra,
S.J.S.V.,Shrivihar,PURI,
Odisha-752003

# सामप्रतिकाले धर्मशास्त्रानुसारेण संस्काराणां प्रभाव, प्रासङ्गिकता च

**Dr.Anil Kumar Dash**

भारतीयसमाजे संस्काराणामपि महत्वपूर्णस्थानं विद्यते। संस्कारों हिन्दुसम्प्रदायस्य महत्वपूर्णमङ्गं भवति संस्कारेण मनुष्यः संस्कृतो भवति। समुपसर्गात् कृधातोञि प्रत्यये भूषणार्थे च कृते संस्कार शब्दों निष्पद्यते। आङ्गलभाषायामयं संस्कारशब्दः Ceremony, Rite, Sacrement इत्यादि शब्दै र्व्यवह्रियते। स च संस्कारशब्दो विभिन्नेषु भारतीयशास्त्रेषु विभिन्नार्थको दृश्यते। यथा - भावस्य व्यक्तिकरणायाऽऽत्मव्यञ्जक शक्तिरुपन्वेन नैयायिकाः, स्नानाचमनादिजन्य जीवधर्मन्वेन वेदान्तिनः, शिक्षा - प्रशिक्षण – संस्कृति – संस्करण – परिष्करण – भूषण – स्मरणशक्ति – शुद्धिक्रिया - धार्मिकविधिविधानादिरूपन्वेन च साहित्यिकाः संस्कारशब्दं व्यवहरन्तो दृश्यन्ते। वस्तुतो धर्मशास्त्रानुसारेण मानवस्य कायिकमानसिकवाचिकपरिशुद्ध्यर्थं धार्मिकक्रियानुष्ठानेनात्मनि जायमानो धर्मविशेषः संस्कार इति संस्कारशब्दार्थः। प्रसङ्गेऽस्मिन्नुक्तं मित्रमिश्रेण यत् – आत्मशरीरान्यतरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कार इति। स च द्विविधः उपनयनादिजन्यो वेदाध्ययनाधिकारापादक एकः उत्पन्नदुरित मात्रनाशको जातकर्मादिजन्योऽपरः।

हारीतेन द्विविध एव संस्कारः प्रतिपादितः ब्राह्मो दैवश्चेति। गर्भाधानादि स्मार्त्तो ब्राह्मः, पाकयज्ञा हविर्यज्ञाः सौम्याश्चेति दैवः, ब्राह्मेण संस्कारेण संस्कृतो मानवः ऋषिणां सलोकतां गच्छति, दैवेन च संस्कारेण संस्कृतो देवानां सलोकताम् मनुमतानुसारेण गर्भाधानादारभ्यान्त्येष्टि यावत् लोकप्रियास्त्रयोदशसंस्काराः सन्ति। ते यथा-

गर्भाधानं, पुंसवन, सिमन्तोन्नयनं, जातकर्म, नामकरणं, बहिर्निह्क्रमणम्, अन्नप्राशनं, चूडाकरणम्, उपनयनं, केशान्तः, समावर्त्तनं, विवाहः, अन्त्येष्टिश्चेति।[1] व्यासमातानुसारेण षोडशसंस्काराः सन्ति।[2] अङगिरास्तु पञ्चविंशतिसंस्कारान् प्रत्यपादयत्।[3] गौतमेन सर्वाधिका अष्टचत्वारिंशत् संस्काराः प्रतिपादिताः।

एतैः संस्कारैर्नकेवलं मानवस्य नैतिकाध्यात्मिक भौतिकसांस्कृतिकादिविकासा भवन्ति, अपि तु सामाजिक विकासेन सह व्यक्तिन्वस्यापि अभिवृद्धिर्भवति। गर्भधानादि संस्कारद्वारा मानवः कायिकशुर्द्धि प्राप्य समाजे विकसितवैदिकमानवरूपेण परिगण्यते, अस्मिन् प्रसङ्गे भगवता मनुना उक्तं यत् –

**गार्भहोम-जातकर्म-चौड-मौजी निबन्धनैः।**
**वैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥**[4]

एतैषु संस्कारैषु ये लोकप्रियाः त्रयोदशसंस्कारास्तेषां प्रभावः प्रासङ्गिकता च प्रतिपाद्यन्ते। गर्भाधानम् – गर्भस्याधानं गर्भाधानाम्। येन कर्मणा गर्भस्याधानं क्रियते तत् कर्म गर्भाधानमिति संस्कारविशेषः।[5] निषेकादिश्मशानान्तां निषेकाद्याः[6] श्मशानान्ताः इत्यादिमनुयाज्ञवल्क्यादिवचनानुसारेण गर्भाधानस्य संस्कारेषु प्राथम्यं बोध्यते। तच्च गर्भाधानम् ऋतुकाले क्रियते। विवाहानन्तरमेवास्य काल आगच्छति, अस्मिन्नेव संस्कारे पतिरेव कर्त्ता नात्र प्रतिनिधिः स्वीक्रियते। परन्तु प्राक्काले क्लिवस्य मृतस्य पतितस्य वा भार्यायां नियोगविधिनां तस्य भ्राता गर्भाधानं कृत्वा

पुत्रोत्पादानं गुरूणामनुमतिं गृहीत्वा करोति स्म यथोक्तं याज्ञवल्क्येन –

**अपुत्रा गुर्वनुज्ञातो देवरः पुत्रकाम्यया।**
**सपिण्डो वा सगोत्रो वा घृताभ्यक्तः ऋतावियाद॥**
(या. स्मृ. आ. ६८)

परन्तु सम्प्रति नियोग विधि नैव प्रचलति। "कलिवर्ज्ये तस्य पाठात्"। अतो गर्भाधानकर्मणि पतिरेव कर्त्ता।

भार्यागृह्णार्थ शास्त्रकारैरुद्देश्यत्रयं कल्पितम् – धर्मः, पुत्र,रतिश्च अर्थाद् यज्ञसम्पादनार्थं, पुत्रोत्तपादनार्थं, सम्भोगार्थमपि भार्याया आवश्यकता वर्त्तते। तेषु त्रिषूद्देश्येषु पुत्रोत्पादनमेव मुख्यं यतोहि पुत्रोत्पादनेन पितुरानृण्यं स्वर्गादिप्राप्तिश्च मन्वादिभिः कल्पिताः। तस्मान्निदिष्टे काले शास्त्रेक्तेन विधिना गर्भधानसंस्कारोऽयं कर्त्तव्य एव।

**पुंसवनम् –** पूमान् सूयतेऽनेनेति पुंसवनम् येन संस्कारेण पुत्रोत्पत्तिरवश्यमेव भवति स एव पुंसवनमित्युच्यते। प्राक्काले समाजे पुत्राकांक्षा कन्यापेक्षयाऽधिकाऽऽसीत्।

"पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते" इत्यादि मनुवचनात् पुत्रस्य प्रशंसाऽपि शास्त्रे श्रूयते। अतो गर्भचलनात् प्राक् पुंसवनसंस्कारः क्रियते। पुनः पुण्यानक्षत्रयुक्तायां तिथौ पुत्रजनननिमित्तं पुंसवनसंस्कारः क्रियते। केषाञ्चिन्मतानुसारेण अयं संस्कार एकवारं कर्त्तव्यो न प्रतिगर्भम्।

आश्वलायन गृह्यसूत्रे पत्नी उपोष्य स्वकरतले गण्डुषमात्रं दधि संस्थाप्य तन्मध्ये शिम्बिकावीजद्वयं तदनन्तर चैक यवं संस्थाप्य पिबेत्। तदा पतिः पृच्छति किं पिवसीति। पत्नी च पुंसवनमित्युत्तरदद्यात् एव त्रिवारं दधि पिवेत्। अस्य संस्कारस्य कर्त्ता स्वयं पतिरेव।

**सीमान्तोन्नयनम् –** अयं संस्कारः गर्भधानात् षषेऽष्टमे वा मासि क्रियते। अस्मिन् संस्कारे पतिः गर्भिण्याः सीमान्तस्यार्थात् केशपाशस्योन्नयनं करोत्यर्थात् केशपाशमलंकुर्वन् तस्मिन् सीमन्तं रचयति। यतोहि गर्भस्तेन सुस्थितो भवति। संस्करस्यास्यापरमपि प्रयोजनं यत् गर्भिण्याः केशपसाधनेन गर्भनारवलान्ता पत्नी प्रमोदिता भवति येन गर्भस्थशिशो विकाशः पुष्टिश्च सुतरां जायते।

**जातकर्म –** गर्भकोशात् शिशौ जाते जातकर्म विधीयते। पुत्रमुखदर्शनेन पिता तस्य नाभिवर्द्धनात् प्राक् हिरण्येन चमसेन मधुसर्पिषां प्राशनं मन्त्रवत् पिता कुर्यात्। यद्यपि वैश्वानरं द्वादशक पालं निर्वपेत् पुत्रे जाते इति वेदोक्तो नियमो विद्यते, तथापि जात प्रमाण वियोगभयात् अशौचन्ते तत् कर्म कर्त्तव्यम्। जातपुत्रं दृष्टवापितर आनन्दी भवन्ति इति हेतोः जातकर्मणि पितृनुद्दिश्य नान्दीमुखीश्राद्धादिकमपि क्रियते।

**नामकरणम् –** नामकरणसंस्कारस्यतीव महत्वं विद्यते। यथा व्यवहारार्थ कस्यचिद् वस्तुनो नामापेक्ष्यते तथैव मनुष्यस्य नामकरणस्यावश्यकतास्ति। एवञ्च जन्मतो दशमे द्वादशे वा भेदो दृश्यते यथा ब्राह्मणस्य नाम मङ्गलसूचकं क्षत्रियस्य वलान्वितं वैश्यस्य धनसयुक्तं शुद्रस्य च जुगुप्रसितं स्यात्। पुनश्च ब्राह्मणस्य नाम्नोऽन्ते शर्मा क्षत्रियस्य वर्मा, वैश्यस्य गुप्ता शुद्रस्य च दास इति उपमान संयुज्येते। यथोक्तं व्यासेन –

**शर्मेति ब्राह्मणस्योक्तं वर्मेति क्षत्रियस्य तु।**
**गुप्तदासात्मकं नाम प्रशस्तं वैश्यशुद्रयोः॥** इति
(वी.मि.सं.प्र. पृ.-२४३)

देशविशेषे स्वनाम्ना सह वंशनाम, ग्रामनाम, पितृनाम-संबोधनस्यापि परम्परा विद्यते।

**निष्क्रमणम् –** जन्मतश्चतुर्थे मासि शिशुः सूतिकागृहात् बहिरानीयते प्रथमं मातुर्गर्भान्निष्क्रम्य प्रसूतिगृहं ततश्च निष्क्रम्य बहिरागत्य विश्वात्मकं व्यक्तित्वं संवर्द्धयितुं समाजे तत् तत् नाम्ना परिचीयते। निष्क्रमदिवसे सूर्यस्य दर्शनं रात्रौ च चन्द्रस्य दर्शनं शिशौः कार्यते।

**अन्नप्राशनम् –** जन्मतः षष्ठे मासेऽन्नप्राशनं क्रियते। षष्ठेऽन्नप्राशनं मासीति मनुवचनात् सामान्यतो दधिमधुघृतमिश्रमन्नं शिशवेपृप्राशनाय दीयते तद् भोजनग्रासं पिता भूर्भुवः स्वरिति व्याहृत्युच्चारणं कुर्वन्नेव दद्यात्। अन्नस्य भोजनं न केवलं जीवनधारणाय अपि तु व्यक्तित्वस्य विकाशनाय कल्प्यते। तद्दिनादारभ्य शिशुर्बहिषं खाद्यं गृहणान्मातृस्तन्यापानान्निवृत्तो भवति। एवण्य कर्म शुभे लग्ने, योगे नक्षत्रे च शुभे चन्द्रे च कार्यम्।

**चूडाकर्म –** मनुमातानुसारं शिशो प्रथमे तृतीये वर्षेवा चूडाकरणे शिखाव्यवस्थाऽतीवमहत्वपूर्णा। शिरसि शिखरे शिरासन्धीनां सम्मिलनं भवति।

चूडाकरणे शिखाव्यवस्थाऽतीव महत्वपूर्णा। सम्प्रत्याधुनिकैः शिखाधारण न क्रियते इति महतः खेदस्य विषयः।

**उपनयनम् –** वेदाध्ययनार्थ शिष्यस्य गुरोराचार्य्यस्य वा समीपे गमनमुपनयमुच्यते। अत्र पित्रैव मुख्यः संस्कर्त्ता। यदि पिता वेदमध्यापयितुमसमर्थस्तर्हि स्वयं स्वपुत्रमाचार्य्यस्य समीपं नीत्वा तस्योपनयनाय प्रार्थयेत्। आचार्यस्तमुपनीय शिष्यत्वेन गृहीत्वा तमध्यापयति।

जन्मना जायते शूद्रः संस्काराद् द्विज उच्यत इति वचनादुपनयन संस्कारेणैव द्विजत्वमाप्यते। शूद्रस्य तदभावात्स एकजाति रित्युच्यते। अनेन संस्कारेण संस्कृतस्य मानवस्य सामाजिकं जीवनामारभ्यते। वसन्ते ब्राह्मणं, ग्रीष्मे राजन्यं शरदि वेश्यं, गर्भाष्टिमे ब्राह्मणं, गर्भेकादशे क्षत्रियं गर्भद्वादशे च विशमुपनयेदित्यादिवचनेन द्विजातीनामुपनयनस्य विभिन्नाः कालाः उक्ताः। उपनयन- संस्कारकालस्य परमावधिरपि शास्त्रकारैर्निर्द्धारितः। तद्यथा – आषोडशाद् ब्राह्मणस्य आद्वाविंशात् क्षत्रियस्य आचतुर्विंशाच्य वैश्यस्योपनयनं कर्त्तुं शक्यते। यथोक्तकालानन्तरं ब्राह्मणक्षत्रियवैश्या अनुपनीता व्रात्या इत्युच्यन्ते। प्राचिने काले नारीणामप्युपनयनं भवति स्म। लोपामुद्रा – गार्गी – मैत्रयीप्रभृतीनामुपनयनसंस्कारोऽनुष्ठित इति रोतिहासिकावदन्ति।

एवं प्रकारेणोपनयन संस्कारेण मानवः समाजे प्रवेशार्हतां प्राप्य स्नातकरूपेण सम्पूर्ण सामाजिको भवति। तस्य जीवनविन्यासः समाजस्यादर्श इति प्रमाणितम्। ततश्च गृहस्थाश्रम परिपालनाय गृहणीमपेक्षते।

**केशान्त –** ब्रह्मचर्यसमास्यनन्तरं केशान्तसंस्कारः भवेत्। अस्मिन् संस्कारे ब्रह्मचारो केशानां श्मश्रूणां च सर्वप्रथमतः वापनं कुर्यात अयं संस्कारः षोडश वर्षे सम्पाद्यते। अस्यापरं नाम गोदानं भवति

संस्कारान्ते मौनव्रतं पालयते एकवर्षपर्यन्तं चानुशासिम जीवननिर्वाह क्रियते।

**समावर्त्तनम् –** वेदाध्ययनानन्तरं गुरुगृहात् स्वगृहं प्रति प्रत्यावर्त्तनमेव समावर्त्तनमिति उच्यते।

**विवाहः –** सहधर्मचारिणीसंयोगो विवाहः। विवाहस्य प्रयोजनत्रयं दृश्यते। धर्मार्थ पुत्रार्थ रत्यर्थञ्च भार्या गृह्यते। कन्या ऋतुमती सती गृहे त्रीणि वर्षाणि अपेक्षेत। तत् कालाभ्यन्तरे यदि पिता उपयुक्ताय वराय न ददाति तर्हि सा स्व-सदृशं पति वरयेत्। प्राचीनसमाजे स्वयंवरस्य प्रचलनमासीत्। रामायणकाले सीतायाः महाभारतकाले च द्रौपद्याः स्वयंवरमुल्लेखनीयम्। भारतीया नारी एकवारमेकवराय प्रदीयते। विवाहानन्तरं परपुरुषचिन्तनमपि तस्याः पापाय कल्पयते। अपत्नीको मानवः समाजे कस्मिन्नपि श्रौतस्मार्त्तकर्मणि योग्यो न भवति। अतः सर्वेषां वर्णानां कृते विवाहसंस्कारो-ऽनिवार्य्य एव, विवाहः एवः व्यक्तिगत संस्कारो न भवति। अयं पारिवारिकः सामाजिको वा संस्कार इत्युच्यते। हिन्दुं समाजे पुरुषः सर्वावस्थायां नार्य्याः रक्षणं करोति। उक्तं च मनुना –

**पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।**
**रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति॥** (म.स्म.-१.३)

अयमेव विवाहः ब्राह्मदैवार्षप्राजापत्यगान्धर्वासुरराक्षस-पैशाचभेदेनाष्टविधः। एतेषु प्रथमे चत्वारो धर्म्याः अपरे चत्वारश्याधर्मा इति। विवाहे यौतकप्रथाऽपि प्राक्कालात् समाजे प्रचलति।

कन्यादानकाले पिता यथाशक्ति कन्यामलंकृत्या ददाति। तदानीं तत् सम्बन्धिनोऽपि तां कन्यामुद्दिश्य वराय यदददति तद् योतकमित्युच्यते। साम्प्रतिकी यौतकप्रथा ततों भिन्ना दृश्यते यतो हि वरपिता कन्यापितरं धनं यौतकरूपं याचते। प्राचिनेकाले कवचित् कन्या विक्रयो भवति स्म परन्तु सम्प्रति वरविक्रयो दृश्यते इति महतः खेदस्य विषयः। यद् भवतु विवाह संस्कारेण बहुविधसामाजिक समस्यानां समाधानेन सह यौन समस्याया अपि नियन्त्रणं क्रियते इत्यत्र नास्ति संशयः। अनेन प्रकारेण संस्काराः मानवजीवनस्य विकासार्थ समाजस्य कल्याणाय च परिकल्प्यते।

**अन्त्येष्टिः –** मनुयाज्ञवलक्यादिभीअन्त्येष्टया अपि मरणोत्तर-संस्कारत्वेन स्वीकारः कृतः। मृतं दाहादिनां संस्कृत्य तद्वद्देश्येन तिलोदक पिण्डदानानि क्रियन्ते, अन्यथा तस्य प्रेतत्वं न गच्छेत्। बालानां सिद्धपुरुषाणां महात्मनाञ्च भूमौ निखखनं क्रियते। परन्तु सामान्यतः शवस्य दाहसंस्कारः सर्वमान्यो भवति। ततश्च सपिण्डादय अशौचं यथाविधिः पालायन्तः प्रेतोद्देशेन श्राद्धादिकं कुर्वन्ति। सपिण्डीकरणेन प्रेतत्वविनाशेन सह पितृत्वप्राप्तिर्भवतीति शास्त्रेषूक्तम्। पतिमरणे पत्नी विधवा जायते। सा च मृतपत्युः चितामारुह्य दग्धीभूता सती सतीपदवाच्या भवति। सम्प्रति सा प्रथा लुप्ता। परन्तु विधवा यतिधर्मेण स्थित्वा शुक्लवस्त्रं परिधाय गन्धालंकारादिरहिता। भर्तृकुलं समाश्रयेत् अन्यथा समाजे सा निन्दिता भवेत्।

समाजस्य सुरक्षार्थ संस्कार एव मुख्यं साधनं येन संस्कृतो मानवः समाजं सेवितुं शक्नुयात्। अतो यावत्पर्यन्तं सामाजिकानां मनः संस्कृतं न भवेत्। तावत पर्यन्तं समाजे श्रृङ्गला अनुशासनं च सम्यक न प्रचलेत्। अस्मात् संस्काराः सामाजिकताया प्रतिकभूताः साधनरुपाश्च भवन्ति। एतावता संस्काराणां प्रभावः, प्रासङ्गिकता च कीदृशी कियती चेती तत् सम्यगवगम्यते। इत्याल्यम् ।

**सहायकग्रन्थसूचीः –**


1.हिन्दुसंस्कार – डॉ.राजबली पाण्डेय, चौखम्बा संस्कृत सिरिज्. वारणसी।

2.संस्कार मयूरव – नीलकण्ठभट्टः, गुजराती प्रिण्डिं प्रेस मुम्बई।

3.गौतमधर्मसूत्रम् – मिताक्षरा, हरदत्तकृत, उमेशपाण्डेय संपादितः,चौखम्बा संस्कृत सिरिज् ऑफिस, वारणसी १९८६।

4.मनुस्मृति – चौखम्बा – संस्कृत – सिरिज् - ऑफिस, वारणसी १९७०।

5.याज्ञवल्क्यस्मृतिः – निर्णयसागर मुद्रणालयः, मुम्बई ,१९४९

6.वीरमित्रोदयः – (संस्कारप्रकाशः) , चौखम्बा-संस्कृत-सिरिज्-ऑफिस, वारणसी १९८७।


**सन्दर्भ ग्रन्थ सूचीः**


1.हिन्दु संस्कार- पृ. २४

2.स.मयूरवः - पृ. ११

3.गौ.ध.सू. १-८.१४.२४

4.म.स्मृति. – २- २५

5.म.स्मृति – २-१६

6.या.स्मृ.आ. – १०